[ 85 ] Seat No.________ **No. of Printed Pages: 02**

**Sardar Patel University**

M. A. **Examination** IV[th] **Semester** (CBCS) **Sanskrit**

Saturday **Date**: 23/03/2019 **Time:**02:00 p.m. to 05:00 p.m.

**PA04CSAN23: Unseen:** Essay, Translation (Sanskrit to Gujarati & Gujarati to Sanskrit), Question from Sanskrit Paragraph

**Total Marks: 70**

प्र-१ बहुविकल्पीय प्रश्ना:- सर्वे समाधेया:। (१०)

१. हरि: ______ अधितिष्ठति।

(A) वैकुण्ठो। (B) वैकुण्ठाय। (C) वैकुण्ठस्य। (D) वैकुण्ठम्।

२. परोपकाराय ________ वृक्षा:।

(A) फलसि। (B) फलन्ति। (C) फलति। (D) फलाय।

३. सर्पस्य वार्ताम् ________ सर्वे जना: भयभीता:।

(A) श्रोतुम्। (B) श्रूयं। (C) श्रुत्वा। (D) पीत्वा।

४. 'गुरु' इति शब्दस्य चतुर्थ एकवचनम् किम्?

(A) गुरवे। (B) गुरो:। (C) गुरुणाम्। (D) गुरुवे।

५. ________ किं हसथ।

(A) वयम्। (B) त्वाम्। (C) यूयम्। (D) अहम्।

६. लोभ: ______ कारणम्।

(A) पापम्। (B) पापात्। (C) पापेन (D) पापस्य।

७. पर्वतस्य ________ मेघा: वर्षन्ति।

(A) अध:। (B) उपरि। (C) अधो अध:। (D) श्व:।

८. ________ क्रोध: अभिजायते।

(A) कामस्य। (B) कामेन। (C) कामानाम्। (D) कामात्।

९. ________ कालिदास: श्रेष्ठ:।

(A) कवि:। (B) कविम्। (C) कविभि:। (D) कवीनाम्।

१०. सोम: _______शतं धारयति।

(A) देवदत्तम्। (B) देवदत्त:। (C) देवदत्ताय। (D) देवदत्तस्य।

प्र- २ **अधोलिखितेषु निबन्ध: लिखतु। (एक:)** (१५)

१. अहिंसा परमो धर्म:।

२. संस्कृतभाषाया: वैशिष्ट्यं सौष्ठवं च।

प्र- ३ **अधो लिखितेषु गुर्जरभाषया अनुवादो विधेय:। (एक गद्यखण्डस्य)** (१५)

१. सर्वत्र शिक्षकस्योपरि महदुत्तरदायित्वं भवति। राष्ट्रनवनिर्माणेऽध्यापकस्य विशिष्टं प्रदानं वर्तते। यद्यहं शिक्षको भवेयं तर्हि सर्वप्रथमं तु मम छात्राणां हृदयेषु विद्याप्राप्तेस्तीव्रेच्छां प्रकटयितुं प्रयत्नं कुर्याम्। अद्य विद्यार्थिनो विद्या तु भाररूपा मन्यन्ते, ग्रन्थान् शत्रुवन्मन्यन्ते शालाभ्यश्च भीता: भवन्ति। अहं विद्याध्ययनेऽध्यापने च रसमुत्पाद्य छात्रान् विद्याभिमुखान् प्रथमं प्रकुर्याम्। शिक्षकस्य स्थानमर्थप्राप्ते: साधनं नास्ति। मम शिक्षकपदस्य गौरवं जानन्नहं यथार्थज्ञानप्रदानमेव मम श्रेष्ठं कार्यं मन्ये। यमपि विषयमहं पाठ्येययम् तस्य पूर्णं सम्यक् च ज्ञानं छात्रेभ्यो दास्यामि।

(P.T.O.)

२. अथतां तथा शप्तां सरस्वतीं दृष्ट्वा भगवान् कमलयोनिः पूरयन्नाशाः स्वरेण सुधीरमुवाच। ब्रह्मन्, न खलु साधुसेवितोऽयं पन्था येनासि प्रवृत्तः नहन्त्येष परस्तात्। उद्दामप्रसृतेन्द्रियाश्वसमुत्थापितं हि रजः कलुषयति दृष्टिमनक्षजिताम्। कियदूरं वा चक्षुरीक्षते। विशद्धया हि धिया पश्यन्ति कृतबुद्धयः सर्वानर्थानसतः सतो वा। निसर्गविरोधिनी चेयं पयः पावकयोरिव धर्मक्रोधरिव धर्मक्रोधयोरेकत्र वृत्तिः। आलोकमपहाय कथं तमसि निमज्जसि। क्षमा हि मूलं सर्वतपसाम्। परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिर्न ते आत्मरागदोषं पश्यति।

प्र- ४ **अधो लिखितेषु संस्कृतभाषया अनुवादो विधेयः। (एक गद्यखण्डस्य)** (१५)

१. પ્રાચીન સમયમાં સંભળાય છે કે ભરતવંશના પાંડુ અને ધૃતરાષ્ટ્ર રાજાઓ થઈ ગયા. પાંડુની પૃથા અને માદ્રી નામની બે પત્નીઓ હતી. ધૃતરાષ્ટ્રને ગાંધારી નામની પત્ની હતી. પાંડુને પાંચ પુત્રો થયા તે પાંડવો નામે જગતમાં જાણીતા છે તેમનાં નામો યુધિષ્ઠિર, ભીમ, અર્જુન, નકુલ અને સહદેવ એમ પડ્યાં. એમાંથી ત્રણ પૃથાથી ઉત્પન્ન થયાં તેથી તે પાર્થ કહેવાયા.

२. કરણે આશ્ચર્ય સાથે મહેશને કહ્યું. આપના સ્વામીએ આપને મૂર્ખ કહ્યો તે બાબત તેં સ્વીકારી લીધી. મહેશ કહે છે-અહીં સ્વીકાર કરવો એ શ્રેયકારી બાબત છે. હું મૂર્ખ નથી. આપે શા માટે મને મૂર્ખ કહ્યો એવો વિવાદ માલિક સાથે કરવો યોગ્ય નથી. તેમ કરવામાં કલહ થાય અને કહું તો માલિક મને નોકરીમાંથી કાઢી મૂકે તો મારી રોજીરોટીનું શું ?

प्र- ५ अधो लिखित गद्यखण्डात् संस्कृतभाषया उत्तरं लिखतु। (१५)

कस्मिंश्चिदरण्ये केचन बलीवर्दाः सन्निधावेव सततमेवातिष्ठन्त। भक्ष्यार्थं इतस्ततः परिभ्रमद्भ्यो हिंस्रेभ्यः पशुभ्यः तेषां भयम्। कश्चित् सिंहः एकत्र चरतः तान् दृष्ट्वाऽचिन्तयत्। योऽहं मदमत्तस्य गजस्य गण्डस्थलं भिनद्धि, सुबहून् पशूनेकाकी हिनस्ति। सोऽहमेतानल्पबलान् वृषभान् किमनायासेन न हिंस्याम्? सत्त्वरमभिपत्यैतान् लीलया छिनद्धि इति विचिन्त्य सहसा तान् वृषभानभ्यपतत्। परं स्वरक्षणदक्षाः संहताः बलीवर्दासस्तं केसरिणं सपद्येव समन्तात् परिवेष्ट्याभिनन्दन्।

तदा क्षातङ्गो महता कष्टेन पलायमानः स मृगेन्द्रः स्वगतमभाषत। "बहूनां अल्पसाराणां संहितः कार्यसाधिकेति" जनाः सत्यं भणन्ति। मया तदनुभूतम्। एभिरधमैर्बलीवर्दैरहं शृङ्गप्रहारै-र्जर्जरीकृतोऽस्मि। भवतु। यदि वृषभेतान् हत्वा न भुञ्जीय तर्हि कोऽर्थो मम मृगाधिपत्येन। अथ एषामैक्यामृतं कलहविषेण दूषयामि। एवं संप्रधार्य स संज्ञाभिरूपजापैश्च तेषु कलहमुत्पादयितुं प्रायतत। अचिरादेव तेषामौदासीन्यं द्वैषस्य परां काष्ठां गतम्। अन्ततश्चैते यावच्छक्यं परस्परदर्शन-मपि पर्यहरन्। इदमालोक्य स धूर्तः कण्ठीरवस्तान् सर्वान् बलीवर्दान् सलीलमहिनत् तेषां मासं च यथेच्छमभुंक्त।

**प्रश्नाः**

१. **बलीवर्दानां केभ्यः भयम् ?**

२. **बलीर्वदाः कथं केसरिणं अभिन्दन् ?**

३. **संहतिं उद्दिश्य जनाः किं भणन्ति ?**

४. **सिंहः बलीवर्देषु कलहं उत्पादयितुं कथं प्रायतत ?**

— X —

(2)